DU MPhil Phd in Sanskrit

Topic:- SANS MPHIL

1) “व्युत्पत्त्यर्थस्य दृष्ट्या कतमः शब्दः ‘Research’ इत्यस्य मूलशब्दार्थं सर्वाधिकं निर्वहति-[Question ID = 8432]
1. शोधः [Option ID = 33725]
2. गवेषणा [Option ID = 33726]
3. अनुसन्धानम् [Option ID = 33727]
4. अनुशीलनम् [Option ID = 33728]

2) बडौदातः प्रकाशितस्य रामायणस्य संस्करणस्य प्रधानसम्पादकोऽस्ति-[Question ID = 8433]
1. के.एम्.मुंशी [Option ID = 33729]
2. एस्.डी.जोशी [Option ID = 33730]
3. जी.एच्.भट्टः [Option ID = 33731]
4. एच्.एच्. विल्सन् [Option ID = 33732]

3) "Vedic Bibliography" इति ग्रन्थस्यास्य सम्पादकोऽस्ति -[Question ID = 8434]
1. बालगंगाधरतिलकः [Option ID = 33733]
2. स्वामी दयानन्दः [Option ID = 33734]
3. अविनाशचन्द्रदाशः [Option ID = 33735]
4. रामचन्द्रनारायण-दाण्डेकरः [Option ID = 33736]

4) पुरातत्त्वस्य अनुसन्धानाय विख्याता डेकन कॉलेज(Deccan College) इति नाम्नी संस्था वर्तते-[Question ID = 8435]
1. वाराणसीनगरे [Option ID = 33737]
2. पुण्यपत्तननगरे [Option ID = 33738]
3. जयपत्तननगरे [Option ID = 33739]
4. कोलकातानगरे [Option ID = 33740]

5) कस्यां पङ्क्तौ अनुसन्धानस्य प्रयोजनं सांकेतिकरूपेण गर्भितम्--[Question ID = 8436]
1. मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय [Option ID = 33741]
2. तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् [Option ID = 33742]
3. हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये [Option ID = 33743]
4. विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते [Option ID = 33744]

6) असत्यमस्ति-[Question ID = 8437]
1. समालोचनायां न कोऽपि विशिष्टः शोधप्रविधिः स्वीक्रियते [Option ID = 33745]
2. समालोचकः स्वैच्छिकं सिद्धान्तमङ्गीकृत्य समालोचनां कर्तुं प्रभवति [Option ID = 33746]
3. समालोचनात्मके कार्ये समीक्षकस्य रुचिः निष्कर्षं प्रभावयति [Option ID = 33747]
4. पूर्वोक्ताः सर्वे विकल्पाः असाधवः [Option ID = 33748]

7) “शोधगङ्गा” अस्ति--[Question ID = 8438]
1. शोधोपयोगिपुस्तकानाम् अन्तर्जालस्थः मञ्चः [Option ID = 33749]
2. भारतीयविश्वविद्यालयेषु पञ्जीकरणाय शोधोपयोगिविषयाणाम् अन्तर्जालस्थः मञ्चः [Option ID = 33750]
3. पी.डी.एफ्. इति रूपेण उपलब्धानां भारतीयविश्वविद्यालयेषु प्रस्तुतानाम् अप्रकाशित- शोधप्रबन्धानाम् अन्तर्जालस्थः मञ्चः [Option ID = 33751]
4. भारतीयविश्वविद्यालयेषु प्रस्तुतानां शोधप्रबन्धानां शोधसारसंग्रहस्य अन्तर्जालस्थः मञ्चः [Option ID = 33752]

8) “तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ” - अस्य श्लोकांशस्य रोमनलिप्यन्तरणमस्ति-[Question ID = 8439]
1. titīrshudustaraṁ mohaduḍupenāsmi sāgaram. [Option ID = 33753]
2. tītirshudustaraṁ mohaḍudupenāsmi sāgaraṁ. [Option ID = 33754]
3. titīrṣurdustaraṁ mohaduḍupenāsmī sāgarm. [Option ID = 33755]
4. titīrṣurdustaraṁ mohāduḍupenāsmi sāgaram. [Option ID = 33756]

9) अधोलिखितासु कस्यां पङ्क्तौ पाण्डुलिपिविज्ञानस्य ‘वैयर्थ्यसूचकः’ पारिभाषिकः शब्दः प्रयुक्तः?[Question ID = 8440]
1. तनोति भानोः परिवेशकैतवात्तदा विधिः कुण्डलनां विधोरपि [Option ID = 33757]
2. अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् [Option ID = 33758]
3. अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम् [Option ID = 33759]
4. चतुर्दशत्वं कृतवान् कुतः स्वयं न वेद्मि विद्यासु चतुर्दशत्वम् [Option ID = 33760]

10) 'वियद्’ इत्यनेन पदेन द्योतिता संख्या वर्तते-[Question ID = 8441]
1. 0 [Option ID = 33761]
2. 1 [Option ID = 33762]
3. 6 [Option ID = 33763]
4. 9 [Option ID = 33764]

11) महाभारतस्य प्रामाणिकसंस्करणस्य प्रकाशनसंस्थानमस्ति-[Question ID = 8442]
1. सियाजिरावप्राच्यविद्याप्रतिष्ठानम् [Option ID = 33765]
2. विश्वेश्वरानन्दवैदिकशोधसंस्थानम् [Option ID = 33766]
3. भण्डारकरप्राच्यविद्याप्रतिष्ठानम् [Option ID = 33767]
4. भारतीयविद्याभवनम् [Option ID = 33768]

12) अधोलिखितानि वक्तव्यानि पठित्वा समीचीनतमं विकल्पं चिनुत- वक्तव्यम् -(A) सीम्नः निर्धारणस्य अभावाद् “रघुवंशजानकीहरणयोः तुलनात्मकमध्ययनम्” इति विषयः शोधकार्याय अयोग्यः अस्ति वक्तव्यम्-(B) अतिव्याप्तिदोषत्वाद् “रघुवंशजानकीहरणयोः तुलनात्मकमध्ययनम्” इति विषयः शोधकार्याय अयोग्यः अस्ति वक्तव्यम्-(C) “रघुवंशजानकीहरणयोः तुलनात्मकमध्ययनम्” इति विषयः सर्वथा शोधकार्याय योग्यमस्ति शोधप्रविधिदृशा उपर्युक्तेषु समीचीनतमः विकल्पः वर्तते -[Question ID = 8443]

1. A, B इति वक्तव्यद्वयं सत्यस्ति ; C इति वक्तव्यम् असत्यमस्ति [Option ID = 33769]
2. A,C इति वक्तव्यद्वयं सत्यस्ति; B इति वक्तव्यम् असत्यमस्ति [Option ID = 33770]
3. B,C इति वक्तव्यद्वयं सत्यस्ति; A इति वक्तव्यम् असत्यमस्ति [Option ID = 33771]
4. C इति वक्तव्यमेव सत्यमस्ति [Option ID = 33772]

13) “विंशशताब्दे भवानां संस्कृतकवीनां जीवनदर्शनम्” इत्यस्य शोधविषयस्य सामग्रीसंकलनाय उपयुक्ततमा पद्धतिः भवेत्-[Question ID = 8444]

1. साक्षात्कारपद्धतिः [Option ID = 33773]
2. टीपपद्धतिः [Option ID = 33774]
3. पुस्तकालयपद्धतिः [Option ID = 33775]
4. सर्वेक्षणपद्धतिः [Option ID = 33776]

14) “पाणिनिव्याकरणे लकारार्थविचारः”- इति विषये शोधाय प्रयोज्या उपयुक्ततमा पद्धतिः अस्ति-[Question ID = 8445]

1. सर्वेक्षणपद्धतिः [Option ID = 33777]
2. प्रवृत्तिमूलकपद्धतिः [Option ID = 33778]
3. समस्यामूलपद्धतिः [Option ID = 33779]
4. वर्गीयाध्ययनपद्धतिः [Option ID = 33780]

15) इन्दिरागान्धिराष्ट्रियकलाकेन्द्रम् स्थापितम्-[Question ID = 8446]

1. भारतशासनस्य संस्कृतिमन्त्रालयेन [Option ID = 33781]
2. भारतशासनस्य मानवसंसाधनविकासमन्त्रालयेन [Option ID = 33782]
3. भारतशासनस्य वित्तायोगेन [Option ID = 33783]
4. पूर्वोक्ताः सर्वे विकल्पा असाधवः [Option ID = 33784]

16) अन्तर्जालके “सूचनानां पुस्तकालयानां च नेटवर्ककेन्द्रं (INFLIBNET)” अस्ति-[Question ID = 8447]

1. सूचनातकनीकीमन्त्रालयस्य अधीनम् [Option ID = 33785]
2. कानपुरस्थस्य भारतीयप्रौद्योगिकीसंस्थानस्य अधीनम् [Option ID = 33786]
3. हैदराबादस्थस्य भारतीयप्रौद्योगिकीसंस्थानस्य अधीनम् [Option ID = 33787]
4. विश्वविद्यालयानुदानायोगस्य अधीनम् [Option ID = 33788]

17) कयोश्चिद् द्वयोः विषययोः अन्तःसम्बन्धम् आधरीकृत्य सम्पद्यमानम् अनुसन्धानम् उच्यते--[Question ID = 8448]

1. प्रवृत्तिनिष्ठम् अनुसन्धानम् [Option ID = 33789]
2. अन्तर्विषयकम् अनुसन्धानम् [Option ID = 33790]
3. तुलनात्मकम् अनुसन्धानम् [Option ID = 33791]
4. समस्यानिष्ठम् अनुसन्धानम् [Option ID = 33792]

18) शोधविषयस्य निर्वाचने निर्देशकस्य भूमिका स्यात्-[Question ID = 8449]

1. निर्णायिका [Option ID = 33793]
2. उत्प्रेरिका [Option ID = 33794]
3. सांकेतिकी [Option ID = 33795]
4. तटस्था [Option ID = 33796]

19) संस्कृतपालिप्राकृतसाहित्यगतानां भारतीयकलानां मूलावधारणानां विश्वकोशः निर्मापितः-[Question ID = 8450]

1. इन्दिरागान्धि-राष्ट्रियकलाकेन्द्रेण [Option ID = 33797]
2. राष्ट्रियनाट्यकलाविद्यालयेन [Option ID = 33798]
3. भारतीयशैक्षिकानुसन्धानप्रशिक्षणपरिषदा [Option ID = 33799]
4. मानवसंसाधनविकासमन्त्रालयेन [Option ID = 33800]

20) शोधविषयस्य पंजीकरणकाले गवेषकस्य अर्हतासु अपेक्ष्यते-[Question ID = 8451]

1. भावुकता [Option ID = 33801]
2. पूर्वगतिः [Option ID = 33802]
3. पूर्वाग्रहः [Option ID = 33803]
4. सहानुभूतिः [Option ID = 33804]

21) शोधनिर्देशकस्य अर्हतासु नापेक्ष्यते-[Question ID = 8452]

1. शोधार्थिनां योग्यतायाः पूर्वबोधः [Option ID = 33805]
2. शोधविषयावबोधः [Option ID = 33806]
3. निजक्षमतावबोधः [Option ID = 33807]
4. शोधनिर्देशने समयाभावः [Option ID = 33808]

22) 2021 तमे खैष्टे वर्षे कतमः संस्कृतविद्वान् ‘पद्मश्रीः’ पुरस्कारेण सम्मानितः?[Question ID = 8453]

1. सिंहः चन्द्रशेखरः [Option ID = 33809]
2. शुक्लः रामयत्नः [Option ID = 33810]
3. वेंकटेशः के.वाई. [Option ID = 33811]
4. शर्मा उमाशंकरः [Option ID = 33812]

23) साहित्य-अकादमी-पुरस्कार-2020 इति पुरस्कारेण पुरस्कृतः संस्कृतविद्वान् अस्ति-[Question ID = 8454]

1. कमलाकान्तझाः [Option ID = 33813]
2. महेशचन्द्रशर्मा गौतमः [Option ID = 33814]

3. रमेशकुमारपाण्डेयः [Option ID = 33815]
4. ताराशंकरपाण्डेयः [Option ID = 33816]

24) "यतो धर्मस्ततो जयः" इति ध्येयवाक्यं कस्याः संस्थायाः वर्तते?[Question ID = 8455]
1. भारतीयनौसेनायाः [Option ID = 33817]
2. केन्द्रियसंस्कृतविश्वविद्यालयस्य [Option ID = 33818]
3. भारतीयवायुसेनायाः [Option ID = 33819]
4. भारतीय-उच्चतमन्यायालयस्य [Option ID = 33820]

25) “पुण्यकोटिः” इत्यस्ति-[Question ID = 8456]
1. बालचित्रकथासंग्रहः [Option ID = 33821]
2. परिहासकथासंग्रहः [Option ID = 33822]
3. एनिमेशनचलच्चित्रम् [Option ID = 33823]
4. संस्कृतधारावाहिनी कथा [Option ID = 33824]

26) “जातानि वैनं विदुः” निर्वचनं वर्तते -[Question ID = 8457]
1. अग्नेः [Option ID = 33825]
2. जातवेदसः [Option ID = 33826]
3. विदुषः [Option ID = 33827]
4. वैनस्य [Option ID = 33828]

27) “हृदि प्रतीष्या कवयो मनीषा”- इत्यस्मिन् मन्त्रांशे “मनीषा” पदमस्ति[Question ID = 8458]
1. प्रथमाविभक्तौ एकवचनम् [Option ID = 33829]
2. द्वितीयाविभक्तौ एकवचनम [Option ID = 33830]
3. तृतीयाविभक्तौ एकवचनम् [Option ID = 33831]
4. उक्तेषु न कोऽपि विकल्पः साधुः [Option ID = 33832]

28) श्वेताश्वतरोपनिषदि वर्णितः जनानां हृदये सन्निविष्टः अन्तरात्मा अस्ति-[Question ID = 8459]
1. कनिष्ठिकामात्रः [Option ID = 33833]
2. वितस्तिमात्रः [Option ID = 33834]
3. मुष्टिमात्रः [Option ID = 33835]
4. अङ्गुष्ठमात्रः [Option ID = 33836]

29) "ईशा वास्यमिदं सर्वम्" इत्यस्मिन् मन्त्रांशे ‘ईशा’ इति पदे का विभक्तिः ?[Question ID = 8460]
1. प्रथमा [Option ID = 33837]
2. द्वितीया [Option ID = 33838]
3. तृतीया [Option ID = 33839]
4. सप्तमी [Option ID = 33840]

30) व्यभिचारिभावादेः स्वशब्दवाच्यत्वादयः .... अपकर्षयन्तः काव्यस्य अपकर्षकाः दोषा उच्यन्ते -इत्यत्र रिक्तस्थानं पूरयितुम् उचिततमं विकल्पं चिनुत-[Question ID = 8461]
1. शब्दम् [Option ID = 33841]
2. अर्थम् [Option ID = 33842]
3. रसम् [Option ID = 33843]
4. रीतिम् [Option ID = 33844]

31) रामादिषु रत्याद्युद्बोधकारणैः सीतादिभिः सहृदयेषु रत्याद्युद्बोधे कारणमस्ति-[Question ID = 8462]
1. विभावादीनाम् अखण्डत्वम् [Option ID = 33845]
2. विभावादीनां साधारणीकरणम् [Option ID = 33846]
3. विभावादीनां परिच्छिन्नत्वम् [Option ID = 33847]
4. विभावादीनां संयोगः [Option ID = 33848]

32) “हे गुणरत्नसागर जगदेकनागर कामिनीमदन जनरञ्जन!” -इत्यस्मिन् वाक्ये गद्यस्य रूपमस्ति-[Question ID = 8463]
1. चूर्णकम् [Option ID = 33849]
2. मुक्तकम् [Option ID = 33850]
3. वृत्तगन्धि [Option ID = 33851]
4. उत्कलिकाप्रायम् [Option ID = 33852]

33) “कस्य विद्या रसनाग्रनर्तकी” इति प्रथिता ?-[Question ID = 8464]
1. श्रीहर्षस्य [Option ID = 33853]
2. कालिदासस्य [Option ID = 33854]
3. नलस्य [Option ID = 33855]
4. चिन्तामणेः [Option ID = 33856]

34) यक्षस्यानुसारेण मेघः जातः - [Question ID = 8465]
1. कश्यपस्य वंशे [Option ID = 33857]
2. इन्द्रस्य वंशे [Option ID = 33858]
3. ऐरावतस्य वंशे [Option ID = 33859]
4. पुष्करावर्तकानां वंशे [Option ID = 33860]

35) उत्तररामचरिते ब्राह्मणपुत्रस्य अकालमृत्योः घटना वर्तते-[Question ID = 8466]
1. प्रथमाङ्के [Option ID = 33861]
2. द्वितीयाङ्के [Option ID = 33862]

3. तृतीयाङ्के [Option ID = 33863]
4. अन्तिमेऽङ्के [Option ID = 33864]

36) मृच्छकटिके खुण्टमोटकः अस्ति-[Question ID = 8467]
1. मत्तबलीवर्दः [Option ID = 33865]
2. मत्तगजः [Option ID = 33866]
3. न्यायालयस्य शोधनकः [Option ID = 33867]
4. आर्यकस्य गुप्तचरः [Option ID = 33868]

37) आत्रेयी कतमां विद्याम् अधिगन्तुं वाल्मीकेः आश्रमाद् दण्डकारण्यं याति--[Question ID = 8468]
1. त्रयीविद्याम् [Option ID = 33869]
2. निगमान्तविद्याम् [Option ID = 33870]
3. आन्वीक्षिकीविद्याम् [Option ID = 33871]
4. अपराविद्याम् [Option ID = 33872]

38) बाणभट्टस्य गुरोः भर्वोः चरणाम्बुजद्वयं कैः कृतार्चनम् अस्ति-[Question ID = 8469]
1. कुषाणैः [Option ID = 33873]
2. मौर्यैः [Option ID = 33874]
3. परमारैः [Option ID = 33875]
4. मौखरिभिः [Option ID = 33876]

39) "ततोऽनेकनल्वशतमध्वानं गत्वा ...." इत्यस्मिन् वाक्यांशे "नल्वशतम्" इति पदस्य अर्थोऽस्ति-[Question ID = 8470]
1. द्विशतहस्तमितम् [Option ID = 33877]
2. चतुःशतहस्तमितम् [Option ID = 33878]
3. अष्टशतहस्तमितम् [Option ID = 33879]
4. द्वादशशतहस्तमितम् [Option ID = 33880]

40) "को दोषः,प्रवेश्यताम्"- इयं पङ्क्तिः कादम्बरी कथामुखे उक्ता-[Question ID = 8471]
1. शूद्रकम् अभिलक्ष्य [Option ID = 33881]
2. मातङ्गकन्याम् अभिलक्ष्य [Option ID = 33882]
3. वैशम्पायनशुकम् अभिलक्ष्य [Option ID = 33883]
4. हारीतम् अभिलक्ष्य [Option ID = 33884]

41) श्रीमद्भागवतमहापुराणं सम्बद्धम्--[Question ID = 8472]
1. शाक्तसम्प्रदायेन [Option ID = 33885]
2. वैष्णवसम्प्रदायेन [Option ID = 33886]
3. शैवसम्प्रदायेन [Option ID = 33887]
4. पाशुपतसम्प्रदायेन [Option ID = 33888]

42) महात्मनः बुद्धस्य परिनिर्वाणकालः मन्यते-[Question ID = 8473]
1. ख्रीष्टाब्दात् प्राक् 530 तमे वर्षे [Option ID = 33889]
2. ख्रीष्टाब्दात् प्राक् 522 तमे वर्षे [Option ID = 33890]
3. ख्रीष्टाब्दात् प्राक् 440 तमे वर्षे [Option ID = 33891]
4. ख्रीष्टाब्दात् प्राक् 483 तमे वर्षे [Option ID = 33892]

43) "शब्दोऽनित्यः,चाक्षुषत्वाद्" इत्यस्मिन् वाक्ये कतमः हेत्वाभासोऽस्ति-[Question ID = 8474]
1. स्वरूपासिद्धः [Option ID = 33893]
2. आश्रयासिद्धः [Option ID = 33894]
3. अनैकान्तिकः [Option ID = 33895]
4. विरुद्धः [Option ID = 33896]

44) "भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च" - अत्र प्रयुक्तेन "भेदानां" इति पदेन अभिप्रेतमस्ति- (A) अव्यक्तप्रकृतिः (B) व्यक्तप्रकृतिः (C) ज्ञः उपर्युक्तेषु विकल्पेषु -[Question ID = 8475]
1. A इति समीचीनः B,C इति असमीचीनौ [Option ID = 33897]
2. B इति समीचीनः A, C इति असमीचीनौ [Option ID = 33898]
3. C इति समीचीनः A, B इति असमीचीनौ [Option ID = 33899]
4. A, B,C इति सर्वे विकल्पाः समीचीनाः [Option ID = 33900]

45) विहितानां कर्मणां विधिना परित्यागः मन्यते-[Question ID = 8476]
1. तितिक्षा [Option ID = 33901]
2. समाधिः [Option ID = 33902]
3. नित्यानित्यवस्तुविवेकः [Option ID = 33903]
4. उपरतिः [Option ID = 33904]

46) "यजेत स्वर्गकामः" - अस्मिन् वाक्ये भावनायाः बोधः भवति-[Question ID = 8477]
1. आख्यातत्वेनैव [Option ID = 33905]
2. लिङ्गत्वेनैव [Option ID = 33906]
3. पूर्वोक्ताभ्याम् उभाभ्याम् [Option ID = 33907]
4. पूर्वोक्तेषु न कोऽपि विकल्पः साधुः [Option ID = 33908]

47) अधोलिखितानि वाक्यानि पठित्वा उत्तरं देयम्- (A) ध्यायं ध्यायं स शिवसायुज्यमवाप (B) सिञ्चति सिञ्चति वाटिकाम् (C) हसित्वा हसित्वा लुठति भूमौ (D) गणयन् गणयन् पणकान् स्थापयति उपर्युक्तेषु वाक्येषु आभीक्ष्ण्यवीप्सादृशा असाधु अस्ति-[Question ID = 8478]
1. A,B,C, D इति वाक्यचतुष्टयं समीचीनम् [Option ID = 33909]

2. A, B,C इति वाक्यत्रयं समीचीनं; D इति वाक्यमसमीचीनम् [Option ID = 33910]
3. A,B इति वाक्यद्वयं समीचीनं; C, D इति वाक्यद्वयमसमीचीनम् [Option ID = 33911]
4. A इति वाक्यं समीचीनं; B, C, D इति वाक्यमसमीचीनम् [Option ID = 33912]

48) घञन्तं पदं नास्ति-[Question ID = 8479]
1. अपामार्गः [Option ID = 33913]
2. विश्रमः [Option ID = 33914]
3. शमः [Option ID = 33915]
4. प्रभवः [Option ID = 33916]

49) भाषाणाम् उत्पत्तिविषये “डिंग-डांगवादः(Ding-dong Theory)” कथ्यते-[Question ID = 8480]
1. रणनसिद्धान्तः [Option ID = 33917]
2. धातुसिद्धान्तः [Option ID = 33918]
3. अनुकरणसिद्धान्तः [Option ID = 33919]
4. संकेतसिद्धान्तः [Option ID = 33920]

50) मूलभारोपीयायाः भाषायाः विषये असत्यमस्ति-[Question ID = 8481]
1. मूलभारोपीयभाषायां प्रथममध्यमोत्तमपुरुषाणां प्रयोगः प्रचलितः आसीत् [Option ID = 33921]
2. मूलभारोपीयभाषायां अपश्रुतिप्रणाली(ablaut) प्रचलिताऽऽसीत् [Option ID = 33922]
3. मूलभारोपीयभाषा अन्तर्मुखी श्लिष्टयोगात्मिका आसीत् [Option ID = 33923]
4. मूलभारोपीयभाषायां सतं वर्गीयाः ध्वनय एव आसन् [Option ID = 33924]